**पञ्चमः पाठः**

# सामाजिकं कार्यम्

## (क्त, क्तवतु प्रत्यय)

(समाज व्यक्तियों का समुदाय है । प्रत्येक व्यक्ति के विकास के अनुकूल परिवेश उत्पन्न करना एवं संकट के समय सब की सहायता करना समाज का परम लक्ष्य होता है । आधुनिक युग में भौतिकवाद के विकास से स्वार्थपरता बहुत बढ़ गयी है । इस दृष्टि से समाज के उपर्युक्त लक्ष्य को चुनौती मिल रही है । फिर भी ऐसी बहुत सी संस्थाएँ तथा कुछ व्यक्ति भी समाजोपयोगी कार्यों में लगे हैं । किसी भी संकट का सामना करना, असहाय व्यक्ति को उचित परामर्श एवं सर्वविध सहायता द्वारा उपकृत करना ऐसी संस्थाओं का एवं व्यक्तियों का कार्य है । प्रस्तुत पाठ में इस विषय का विवेचन किया गया है ।)



मानवस्य विकासेन अद्य संसारः पर्याप्तं नाना सुविधाः लभते किन्तु मनुष्येषु सामाजिकः सम्पर्कः क्रमशः अल्पीकृतः। स्वगृहे एव जनः अनेकानि विज्ञानोपकरणानि प्रयुञ्जानः अन्यान् तुच्छान् मन्यते । कदाचित् एतेषाम् उपकरणानाम् अभावे परिवारे सदस्याः एव उपकारकाः अभवन् । क्रमेण मानवस्य एकाकित्वेन स्वार्थवादः उदितः । इदानीं मनुष्यः स्वकीयं हितमेव सर्वोपरि मन्यते । किन्तु समाजस्य सदस्यरूपेण सर्वेषां

कर्त्तव्यं वर्तते यत् एकैकस्य जनस्य हिताहितं चिन्तयेयुः। कश्चित् संकटापन्नः वर्तते, कश्चिन्मार्गे दुर्घटनाग्रस्तः, क्वचित् जलपूरेण सम्पूर्णस्य ग्रामस्य विनाशः, क्वचित् निर्धनः जनः परिवारपालने असमर्थः, क्वचित् वृद्धाः जनाः उपेक्षिताः, कदाचित् गृहेषु अग्निदाहः, क्वचित् यातायातमार्गः अवरुद्धः, क्वचित् मार्गे वृक्षाः पतिताः, क्वचित् अनाथाः शिशवः, दुर्बलाः महिलाश्च सहायताम् अपेक्षन्ते – इत्येवं समाजे नाना समस्याः जनस्य ध्यानाकर्षणाय वर्तन्ते।



एताः स्वार्थभावेन न समाधेयाः सन्ति, प्रत्युत उपकारपरेण जनेन कल्याणकारिण्या संस्थया वा गृह्यन्ते। सर्वदा न सुखं दृश्यते, संकटोऽपि कस्यापि कुत्रापि भवितुं शक्नोति। एतस्मिन् काले एव सामाजिकं कार्यं जनैः अपेक्षितं भवति। नेदं यत् सामाजिकं कार्यं संकटकाले एव भवति प्रत्युत समाजस्य विकासाय स्वग्रामस्य नगरस्य वा गौरवाय अपि इदं क्रियते। यथा काचित् सामाजिकी संस्था सम्पूर्णं ग्रामं स्वच्छं कुर्यात्, मार्गेषु वृक्षारोपणम्, कूपतडागादिजलाशयानां व्यवस्थाम्, रिक्तेषु क्षेत्रेषु उद्यानानां विन्यासम्, क्वचित् पुस्तकालयस्य, व्यायामशालायाः सामुदायिकभवनस्य वा प्रबन्धनं कुर्यात्। यदि ग्रामे मार्गव्यवस्था नास्ति तदा ग्रामजनानां स्वैच्छिक–श्रमेण मार्गं

© BSEB WEBCOPY NOT TO BE PUBLISHED

निर्मातुं प्रभवन्ति सामाजिकसंस्थाः । तदर्थम् एकोऽपि मनुष्यः कार्यारम्भे समर्थः ।

संकटकाले तु सुतरां वर्धते सामाजिकं कार्यम्। क्वचित् निर्धने परिवारे विवाहयोग्यानां किशोरीणां किशोराणां च सामूहिको विवाहोऽपि सार्वजनिकस्थलेषु आयोज्यते । तत्र विवाहस्य सरला रीतिः आडम्बरविहीना दृश्यते । किञ्च काश्चित् संस्थाः निर्धनान् छात्रान् प्रतियोगितापरीक्षार्थं प्रस्तुवन्ति निःशुल्कम् । तदपि महत्त्वपूर्णं कार्यम् । किञ्च क्वचित् यानानां दुर्घटनासु सत्वरं सहायतार्थं समागच्छन्ति, आहतान् चिकित्सालयं प्रापयन्ति, अनाथीभूतान् बालकान् उचितं स्थानं प्रापयन्ति काश्चित् संस्थाः ।

भारते वर्षे नदीनां जलपूरेण यदा विनाशलीला दृश्यते, विशेषेण विहारराज्ये, तदानीमपि सामाजिकसंस्थाः दूरस्थाः अपि समागत्य विविधां सहायतां धनजनसामग्रीरूपां कुर्वन्ति । एकैकेनापि पुरुषेण यदि अपरस्योपकारः क्रियते तदा जीवनं सफलं मन्येत । भारतस्य प्राचीनः आदर्शः आसीत् –

"कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्" ।

यत्र भारते सर्वे प्राणिनः सहायतां संकटकाले लभन्ते तत्र सम्प्रति मनुष्याः अवश्यमेव उपकर्त्तव्याः ।

## शब्दार्थः

| | | |
|---|---|---|
| **अद्य** | = | आज |
| **नाना** | = | अनेक |
| **लभते** | = | प्राप्त करता है |
| **अल्पीकृतः** | = | कम हो गया है |
| **प्रयुञ्जानः** | = | प्रयोग करते हुए |
| **तुच्छान्** | = | नीच, महत्त्वहीन |

BSTBPC WEBCOPY, NOT TO BE PUBLISHED

| | | |
|---|---|---|
| मन्यते | = | मानता है, समझता है |
| कदाचित् | = | कभी |
| उपकारकाः | = | उपकार करने वाले |
| एकाकित्वेन | = | अकेलापन के कारण |
| उदितः | = | उत्पन्न हुआ, प्रकट हुआ |
| इदानीम् | = | इस समय |
| स्वकीयम् | = | अपना |
| सर्वोपरि | = | सबसे ऊपर |
| जलपूरेण | = | जल भरने से, बाढ़ से |
| क्वचित् | = | कहीं |
| अवरुद्धः | = | रुका हुआ, बन्द |
| पतिताः | = | गिरे हुए |
| शिशवः | = | बच्चे |
| अनाथाः | = | जिनके माता-पिता नहीं हैं |
| अपेक्षन्ते | = | चाहते हैं |
| एवम् | = | इस प्रकार |
| वर्तन्ते | = | हैं |
| एताः | = | ये |
| प्रत्युत | = | अपितु, बल्कि |

WBBCOPY, NOT TO BE PUBLISHED © BSTBPC

| | | |
|---|---|---|
| उपकारपरेण | = | दूसरों की भलाई करने वाले (तृतीया विभक्ति) |
| दृश्यते | = | दिखलाई देता है |
| कस्यापि | = | किसी का भी |
| कुत्रापि | = | कहीं भी |
| भवितुम् | = | होने के लिए, होने में |
| शक्नोति | = | सकता है |
| क्रियते | = | किया जाता है |
| काचित् | = | कोई (स्त्रीलिङ्ग) |
| कुर्यात् | = | करें |
| कूपः | = | कुआँ |
| तडागः | = | तालाब |
| रिक्तेषु | = | खाली (सप्तमी विभक्ति) |
| क्षेत्रेषु | = | स्थानों में, विषयों में, खेतों में |
| उद्यानानाम् | = | बगीचों की |
| विन्यासम् | = | रचना, निर्माण |
| निर्मातुम् | = | बनाने के लिए |
| प्रभवन्ति | = | समर्थ / उत्पन्न होते हैं |

© BSTBPC WEBCOPY NOT TO BE PUBLISHED

| | | |
|---|---|---|
| सुतराम् | = | बहुत |
| वर्धते | = | बढ़ता है |
| आयोज्यन्ते | = | मनाये जाते हैं, किये जाते हैं |
| किञ्च | = | इसके अतिरिक्त |
| सत्वरम् | = | शीघ्र |
| समागच्छन्ति | = | आते हैं |
| प्रापयन्ति | = | ले जाते हैं, पहुँचाते हैं |
| तदानीम् | = | उस समय |
| दूरस्था: | = | दूर में रहने वाले |
| समागत्य | = | आकर |
| विविधाम् | = | विभिन्न (द्वितीया विभक्ति) |
| एकैकेनापि | = | एक-एक के द्वारा भी |
| अपरस्य | = | दूसरे का |
| कामये | = | कामना करता हूँ |
| दुःखतप्तानाम् | = | दु:ख से आर्तों का, दु:ख से पीड़ितों का |
| यत्र | = | जहाँ |
| उपकर्त्तव्या: | = | उपकृत करना चाहिए |

## व्याकरणम्

**सन्धि-विच्छेद:**

BSTBPC WEBCOPY NOT TO BE PUBLISHED

| | | |
|---|---|---|
| यद्यपि | = यदि + अपि | (यण् सन्धिः) |
| विज्ञानोपकरणानि | = विज्ञान + उपकरणानि | (गुण-सन्धिः) |
| एकैकस्य | = एक + एकस्य | (वृद्धि-सन्धिः) |
| कश्चित् | = कः + चित् | (विसर्ग-सन्धिः) |
| संकटापन्नः | = संकट + आपन्नः | (दीर्घ-सन्धिः) |
| कश्चिन्मार्गे | = कः + चित् + मार्गे | (विसर्ग-सन्धिः, व्यञ्जन-सन्धिः) |
| निर्धनः | = निः + धनः | (विसर्ग-सन्धिः) |
| दुर्बलाः | = दुः + बलाः | (विसर्ग-सन्धिः) |
| महिलाश्च | = महिलाः + च | (विसर्ग-सन्धिः) |
| इत्येवम् | = इति + एवम् | (यण्-सन्धिः) |
| ध्यानाकर्षणाय | = ध्यान + आकर्षणाय | (दीर्घ-सन्धिः) |
| संकटोऽपि | = संकटः + अपि | (विसर्ग-सन्धिः) |
| कस्यापि | = कस्य + अपि | (दीर्घ-सन्धिः) |
| कुत्रापि | = कुत्र + अपि | (दीर्घ-सन्धिः) |
| नेदम् | = न + इदम् | (गुण-सन्धिः) |
| पुस्तकालयस्य | = पुस्तक + आलयस्य | (दीर्घ-सन्धिः) |
| नास्ति | = न + अस्ति | (दीर्घ-सन्धिः) |
| तदर्थम् | = तत् + अर्थम् | (व्यञ्जन-सन्धिः) |

© BSTBPC
WEBCOPY, NOT TO BE PUBLISHED

| | | | |
|---|---|---|---|
| एकोऽपि | = | एकः + अपि | (विसर्ग-सन्धिः) |
| कार्यारम्भे | = | कार्य + आरम्भे | (दीर्घ-सन्धिः) |
| किञ्च | = | किम् + च | (व्यंजन-सन्धिः) |
| काश्चित् | = | काः + चित् | (विसर्ग-सन्धिः) |
| तदपि | = | तत् + अपि | (व्यञ्जन-सन्धिः) |
| चिकित्सालयम् | = | चिकित्सा + आलयम् | (दीर्घ-सन्धिः) |
| एकैकेनापि | = | एक + एकेन + अपि | (वृद्धि-सन्धिः, दीर्घ-सन्धिः) |
| अपरस्योपकारः | = | अपरस्य + उपकारः | (गुण-सन्धिः) |

© BSTBPC WEBCOPY, NOT TO BE PUBLISHED

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| उदितः | = | उत् + √इ + क्त, (पुँ०), एकवचनम् |
| कर्तव्यम् | = | √कृ + तव्यत् (नपुं.), एकवचनम् |
| अवरुद्धः | = | अव + √रुध + क्त (पुँ०), एकवचनम् |
| पतिताः | = | √पत + क्त (बहुवचन) |
| भवितुम् | = | √भू + तुमुन् |
| निर्मातुम् | = | निस् + + तुमुन् |

समागच्छन्ति = सम् + आ + √गम् लट्लकारः, प्रथमपुरुषः, बहुवचनम्

समागत्य = सम् + आ √मा + √गम् + ल्यप्

कुर्वन्ति = √कृ लट्लकारः, प्रथमपुरुषः, बहुवचनम्

क्रियते = √कृ + यक् (आत्मनेपदम्), लट्लकारः, प्रथमपुरुषः, एकवचनम् (कर्मवाच्ये)

आसीत् = √अस् लङ्लकारः, प्रथमपुरुषः, एकवचनम्

लभन्ते = √लभ् आत्मनेपदम्, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

## अभ्यासः

### मौखिक :

1. **निम्नलिखितानां शब्दानाम् अर्थं वदत –**

   अल्पीकृतः, प्रयुञ्जानः, एकाकित्वेन, हिताहितम्, कदाचित्, प्रत्युत, सर्वदा, सुतराम्, विन्यासम्, वर्धते, आसीत् ।

2. **निम्नलिखितानां पदानाम् एकवचनरूपं वदत –**

   प्रापयन्ति, प्रभवन्ति, अभवन्, सन्ति, आसन्, समागच्छन्ति, कुर्वन्ति

3. **निम्नलिखितानां पदानां बहुवचनरूपं वदत –**

   विज्ञानोपकरणम्, महिला, जनस्य, बालकाय, ग्रामे, फलम्, नदी

### लिखितः

4. **सन्धिं कुरुत –**

   (क) न + इदम् = ..................................................

   (ख) कः + चित् = ..................................................

   (ग) एकः + अपि = ..................................................

© DSERT NOT TO BE PUBLISHED WEBCOPY

(घ) एकेन + अपि = ..................................................

(ङ) निः + धनः = ..................................................

(च) इति + एवम् = ..................................................

## 5. सन्धिविच्छेदं कुरुत

महिलाश्च, कश्चिन्मार्गे, एकैकस्य, यद्यपि, किञ्च, काश्चित्, संकटोऽपि ।

## 6. वाक्यनिर्माणं कुरुत

असमर्थः, इदानीम्, वृद्धः, पतति, गमिष्यामि, वर्तते, आसीत् ।

## 7. मञ्जूषातः शब्दं चित्वा रिक्तस्थानानि पूरयत -

गच्छन्ति, सन्ति, दृश्यते, रोहितः, जनाः, नद्यः

(क) सर्वदा सुखं न ............................ ।

(ख) जनाः गृहं ............................ ।

(ग) वृक्षे आम्रफलानि ............................ ।

(घ) ............................ छात्रः अस्ति ।

(ङ) ............................ प्रवहन्ति ।

(च) ............................ सत्वरं सहायतार्थं समागच्छन्ति ।

## 8. प्रकृति-प्रत्यय- विभागं कुरुत

भवितुम्, निर्मातुम्, गन्तव्यः, आसन्, समागत्य, पठितः

## 9. सुमेलनं कुरुत -

© BSTBPC WEBCOPY, NOT TO BE PUBLISHED

(क) मानवस्य एकाकित्वेन — 1. सर्वोपरि मन्यते ।

(ख) कामये दु:खतप्तानां — 2. स्वार्थवाद: उदित: ।

(ग) इदानीं मनुष्य: स्वकीयं हितमेव — 3. सम्पूर्णं ग्रामं स्वच्छं कुर्यात् ।

(घ) काचित् सामाजिकी संस्था — 4. सार्वजनिकस्थलेषु आयोज्यते ।

(ङ) सामूहिक: विवाह: — 5. प्राणिनामार्तिनाशनम् ।

## 10. विपरीतार्थकशब्दयो: सुमेलनं कुरुत -

| अ | | आ |
|---|---|---|
| (क) गच्छति | - | 1. अनुचितम् |
| (ख) उचितम् | - | 2. अकर्त्तव्य: |
| (ग) तदानीम् | - | 3. असफलम् |
| (घ) समर्थ: | - | 4. पूर्ण: |
| (ङ) रिक्त: | - | 5. असमर्थ: |
| (च) सफलम् | - | 6. इदानीम् |
| (छ) कर्त्तव्य: | - | 7. आगच्छति |

© BSTBPC WEBCOPY, NOT TO BE PUBLISHED

## 11. उदाहरणानुसारम् अव्ययपदानि चिनुत -

**यथा -** शीला श्व: ग्रामं गमिष्यति - श्व: ।

(क) वैभवी कुत्र गमिष्यति ? .................................. ।

(ख) शाम्भवी कदा पठिष्यति ?.............................. ।

(ग) आयुषी चैतन्यः च लिखतः। ...................... ।

(घ) जावेदः उच्चैः अहसत्। ............................ ।

(ङ) जॉनः सर्वदा सत्यं वदति। ..................... ।

**12. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत –**

(क) <u>मनुष्येषु</u> सामाजिकः सम्पर्कः क्रमशः अल्पीकृतः।

(ख) <u>समाजस्य</u> सदस्यरूपेण सर्वेषां कर्त्तव्यं वर्तते।

(ग) <u>सर्वेषां</u> जनानां विकासाय कार्यं कर्त्तव्यम्।

(घ) मम <u>ग्रामे</u> एका सामाजिकी संस्था अस्ति।

(ङ) <u>जनैः</u> सामाजिकं कार्यं कर्त्तव्यम्।

**13. अधोलिखित-तद्भव-शब्दानां तत्समशब्दान् चिनुत**

| | | | |
|---|---|---|---|
| **यथा** – | गाँव | – | ग्राम |
| | आग | – | .................... |
| | कुआँ | – | .................. |
| | खेत | – | .................. |
| | पाँचवाँ | – | .................. |
| | सब | – | .................. |
| | बूढ़ा | – | .................... |

## योग्यता-विस्तारः

## भूतकालिक 'क्त', 'क्तवतु' प्रत्यय

संस्कृत भाषा में भूतकालिक ''कृत्'' प्रत्ययों में **क्त** और **क्तवतु** बहुत लोकप्रिय हैं । **क्त** प्रत्यय सामान्यत: कर्मवाच्य और भाववाच्य में होता है जबकि **क्तवतु** कर्तृवाच्य में होता है । यद्यपि क्रिया के रूप में इनका प्रयोग होता है किन्तु संस्कृत की तिङन्त क्रिया के विपरीत इनमें लिङ्ग भी होता है, तिङन्त में लिङ्ग नहीं रहता ।

### उदाहरण देखें -

पठ् + क्त = पठित, पुँ॰ - पठित:, स्त्री॰ - पठिता, नपुं. - पठितम् । यदि तिङन्त होता तो अपठत् जैसा एक ही रूप रहता ।

### प्रयोग देखें -

**बालकेन ग्रन्थः पठितः** (लड़के द्वारा ग्रन्थ पढ़ा गया), कर्मवाच्य, **ग्रन्थः** पुँल्लिङ्ग है इसलिए कर्म के लिङ्ग के अनुसार क्रिया पुँल्लिङ्ग हुई ।

**बालकेन कथा पठिता** (लड़के द्वारा कहानी पढ़ी गयी) कर्मवाच्य, **कथा** स्त्रीलिङ्ग है, अत: कर्म के लिङ्ग के अनुसार क्रिया स्त्रीलिङ्ग हुई ।

**बालकेन पुस्तकं पठितम्** (लड़के द्वारा किताब पढ़ी गयी) कर्मवाच्य, **पुस्तकम्** नपुंसकलिङ्ग है, इसलिए क्रिया नपुंसकलिङ्ग में हुई ।

क्त प्रत्यय लगने पर **त** बचता है जो कहीं-कहीं **ट** हो जाता है । कभी-कभी (नियमानुसार) त के पहले इ (इट्) लगता है । जैसे पठित:, कथित:, लिखित:, हसित: इत्यादि । त से ट बनने का उदाहरण -

दृश् + क्त = दृष्ट:, दृष्टा, दृष्टम् ।

प्रच्छ् + क्त = पृष्ट:, पृष्टा, पृष्टम् ।

स्पृश् + क्त = स्पृष्टः, स्पृष्टा, स्पृष्टम् ।

नश् + क्त = नष्टः, नष्टा, नष्टम् ।

क्तवतु प्रत्यय में 'तवत्' शेष रहता है । यह कर्तृवाच्य में कर्ता के लिङ्ग के अनुसार होता है । जैसे –

पठ् + क्तवतु = पठितवत् (नपुं.), पठितवान् (पुं.), पठितवती (स्त्री॰)

**वाक्य प्रयोग –**

बालकः पुस्तकं पठितवान् (पुं.) ।

शीला पुस्तकं पठितवती (स्त्री.) ।

क्त प्रत्यय से बने शब्दों में वत्, वान्, वती लगाने से इस प्रत्यय का रूप हो जाता है । कर्ता के अनुसार लिङ्ग ही नहीं वचन भी बदलता है । जैसे–

गम् + क्तवतु = गतवत् । बालकौ गृहं गतवन्तौ । छात्राः विद्यालयं गतवन्तः । बालिका आपणं गतवती । बालिके पाठशालां गतवत्यौ । बालिकाः पुस्तकालयं गतवत्यः । क्तवतु स्त्रीलिङ्ग का रूप 'नदी' के समान होता है । कुछ धातुओं के उदाहरण –

| | क्त | क्तवतु |
|---|---|---|
| पत् (गिरना) | पतितः | पतितवान् |
| | पतिता | पतितवती |
| | पतितम् | |
| दृश् (देखना) | दृष्टः | दृष्टवान् |


Developed by: ABSOL www.absol.in

| | | |
|---|---|---|
| | दृष्टा | दृष्टवती |
| | दृष्टम् | |
| श्रु (सुनना) | श्रुत: इत्यादि | श्रुतवान् इत्यादि |
| ग्रह् (पकड़ना) | गृहीत: | गृहीतवान् |
| लभ् (पाना) | लब्ध: | लब्धवान् |
| पा (पीना) | पीत: | पीतवान् |
| कृ (करना) | कृत: | कृतवान् |

इस प्रकार प्राय: सभी धातुओं से तीनों लिङ्गों में रूप होते हैं। हिन्दी में भूतकाल बनाने के लिए इन्हीं प्रत्ययों के तद्भव का प्रयोग होता है। जैसे –

गत: – गया

मृत: – मरा

कृत: – किया

प्राप्त: – पाया

QQQ

षष्ठः पाठः

# रघुदासस्यलोकबुद्धिः

## ( लट्लकारः )

(प्रस्तुत पाठ में एक कल्पित कथा दी गयी है जिसमें गाँव से आकर नगर में रहने वाले दो परिवारों का वृत्तान्त है । एक परिवार में बच्चों की संख्या अधिक है और दूसरा बहुत छोटा परिवार है । दोनों की स्थितियों का तुलनात्मक चित्रण करते हुए छोटे परिवार को भाग्यशाली माना गया है। देश के समक्ष वस्तुतः अनियंत्रित जनसंख्या एक समस्या है जिसके कारण प्राकृतिक संसाधन कम पड़ते जा रहे हैं। )



अस्ति रामभद्रनामकं समृद्धं नगरम् । तत्र बहवो जनाः स्व-स्व ग्रामान् परित्यज्य नगरनिवासाय परिवारेण सह समागताः । नगरे नाना सुविधाः सन्तीति न सन्देहः । किन्तु नगरस्य नियमाः ग्रामजनान् पीडयन्ति तत्रैको ग्रामपरिवारः हरिप्रसादस्य निवसति । तस्य प्रतिवेशी च रघुदासः स्वपरिवारेण सह सुखेन तिष्ठति । रघुदासस्य पुत्रः बिन्दुप्रकाशः अति मेधावी वर्तते । विद्यालये सर्वदा कक्षायां प्रथमः आगतः, सम्प्रति नगरस्य महाविद्यालये अधीते । बिन्दुप्रकाशस्य मातापितरौ निजस्य सन्तानस्य उन्नतिं विलोक्य

प्रमुदितौ भवतः । लघुपरिवारस्य कारणात् नातिसम्पन्नोऽपि रघुदासः नगरे सुखी वर्तते। यदा-कदा तद्गृहे ग्रामात् जनाः आगत्य तिष्ठन्ति । किन्तु परिवारः कदापि कष्टं नानुभवति ।



:

द्वौ च पुत्रौ वर्तन्ते । तेषां सर्वेषां भरणं पोषणं च सम्पन्नोऽपि हरिप्रसादः सदा चिन्तितः तिष्ठति । कन्यासु तिस्र एव विद्यालये गच्छन्ति, अपराः तिस्रः प्रवेशिकापरीक्षोत्तीर्णाः गृहे एव तिष्ठन्ति । हरिप्रसादः चिन्तयति यत् अधिकाध्ययनेन तासां विवाहसमस्या महती भविष्यति। गृहे स्थिताः ताः परिवारकार्याणि कुर्वन्ति किन्तु सदा परस्परं कलहं कुर्वन्ति । हरिप्रसादस्य पुत्रौ विद्यालये पठतः किन्तु तयोः महत्वाकांक्षा सदैव पितरं पीडयति । माता तावेव सर्वाधिकं मन्यते । तदवलोक्य कन्याः सर्वाः अपि अतीव दुःखिताः भवन्ति । एवं सम्पन्नः हरिप्रसादः प्रतिवेशिनः रघुदासस्य निर्धनस्यापि प्रसन्नतायै ईर्ष्यति । हरिप्रसादस्य विशालेऽपि गृहे आगताः तस्य ग्रामीणाः न प्रसीदन्ति । एतस्य परिवारस्य दुःखस्य चर्चां ते कुर्वन्ति ।

अन्ततः हरिप्रसादः स्वकीयं विशालं परिवारं सदा निन्दति- "रघुदासस्य

लघुपरिवारः। धिक् मां विशालपरिवारजनकम्। वर्तमानकाले ते एव धन्याः सन्ति येषां जनानां परिवारः अल्पकायः। सत्यमुच्यते –

परिवारस्य सौभाग्यं यत्र संख्या लघीयसी ।
विशालपरिवारस्य भरणे पीडितो जनः ॥
देशेऽपि परिवारेषु जनसंख्यानियन्त्रणात् ।
संसाधनानि सर्वेषां सुलभान्येव सर्वथा ॥"

**शब्दार्थाः :**

| | | |
|---|---|---|
| **बहवः** | – | अनेक |
| **परित्यज्य** | – | छोड़कर |
| **सह** | – | साथ |
| **समागताः** | – | आये |
| **प्रतिवेशिनः** | – | पड़ोसी |
| **अधीते** | – | पढ़ता है |
| **विलोक्य** | – | देखकर |
| **प्रमुदितौ** | – | प्रसन्न |
| **यदा-कदा** | – | कभी-कभी |
| **आगत्य** | – | आकर |
| **इदानीम्** | – | इस समय |
| **सम्प्रति** | – | इस समय |
| **तिस्रः** | – | तीन (स्त्रीलिङ्ग) |

| | | |
|---|---|---|
| **अपराः** | – | दूसरी |
| **महती** | – | बहुत |
| **अवलोक्य** | – | देखकर |
| **प्रसीदन्ति** | – | प्रसन्न होते हैं |
| **ईर्ष्यति** | – | डाह करते हैं |
| **लघीयसी** | – | छोटी (तुलनात्मक) |
| **अल्पकायः** | – | छोटा |
| **सर्वथा** | – | सब प्रकार से |
| **लोकबुद्धिः** | – | व्यावहारिक बुद्धि |
| **भरणे** | – | पालन करने में |

## व्याकरणम्

### सन्धिविच्छेदः

| | | |
|---|---|---|
| सन्तीति | = | सन्ति + इति (दीर्घ-सन्धिः) |
| नातिसम्पन्नोऽपि | = | न +अतिसम्पन्नः + अपि (दीर्घ-सन्धिः, विसर्ग-सन्धिः) |
| कदापि | = | कदा + अपि (दीर्घ-सन्धिः) |
| नानुभवति | = | न + अनुभवति (दीर्घ-सन्धिः) |
| प्रवेशिकापरीक्षोत्तीर्णाः | = | प्रवेशिकापरीक्षा + उत्तीर्णाः (गुणसन्धिः) |

तदवलोक्य = तत् + अवलोक्य (व्यञ्जनसन्धिः)

विशालेऽपि = विशाले + अपि (पूर्वरूपसन्धिः)

सदैव = सदा + एव (वृद्धिसन्धिः)

तावेव = तौ + एव (अयादिसन्धिः)

सर्वाधिकम् = सर्व + अधिकम् (दीर्घसन्धिः)

सुलभान्येव = सुलभानि + एव (यण्सन्धिः)

## प्रकृति-प्रत्यय, विभागः

परित्यज्य = परि + + ल्यप्

समागताः = सम् + आ + + क्त (बहुवचनम्)

विलोक्य = वि + √त्यज् + ल्यप्

प्रमुदितौ = प्र + + √गम् क्त (पुँल्लिंगम्, द्विवचनम्)

आगत्य = आ + √लोक् + ल्यप्

उत्तीर्णाः = उत् + √मुद् + क्त (बहुवचनम्)

स्थिताः = √गम् + क्त (बहुवचनम्)

अवलोक्य = अव + √तृ + ल्यप्

गच्छन् = √स्था + शतृ (पुं०)

√लोक्

## अभ्यासः

√गम्

### मौखिकः

## 1. उच्चारणं कुरुत -

नातिसम्पन्नोऽपि, नानुभवति, चिन्ताग्रस्त:, प्रवेशिकापरीक्षोत्तीर्णा:, तावेव, तदवलोक्य, निर्धनस्यापि, प्राप्नुयात्।

## 2. एकपदेन उत्तरं वदत -

(क) रामभद्रनामकं नगरं कीदृशम् अस्ति ?

(ख) हरिप्रसादस्य प्रतिवेशी क: अस्ति ?

(ग) रघुदासस्य पुत्र: क: अस्ति ?

(घ) कस्य द्वौ पुत्रौ स्त: ?

(ङ) हरिप्रसादस्य परिवारे कियत्य: कन्या: सन्ति ?

## लिखित:

## 3. मञ्जूषात: अव्ययपदं चित्वा वाक्यानि पूरयत

एव, च, सदा, अपि, एवम्, अति

(क) तस्य परिवारे षट् कन्या द्वौ .................... पुत्रौ वर्तन्ते ।

(ख) कन्यासु तिस्र: .................... विद्यालये गच्छन्ति ।

(ग) हरिप्रसाद: .................... चिन्ताग्रस्तो वर्तते ।

(घ) .................... सम्पन्न: हरिप्रसाद: प्रतिवेशिन: रघुदासस्य निर्धनस्य प्रसन्तायै ईर्ष्यति ।

(ङ) बिन्दुप्रकाश: .................... मेधावी वर्तते ।

## 4. निम्नलिखितानां शब्दानां प्रकृति-प्रत्यय-विभागं कुरुत -

आगत्य, विहस्य, आगता:, कुर्वन्, तिष्ठन्, पिबन्, मृत: ।

## 5. अधोलिखितानां शब्दानां प्रयोगेण वाक्यनिर्माणं कुरुत -

गृहे, सदा, जनाः, सह, तत्र, यदा-कदा, वर्तते ।

6. **निम्नलिखितानां प्रश्नानाम् उत्तरम् एकवाक्येन लिखत –**

(क) रघुदासस्य पुत्रः कीदृशः अस्ति ?

(ख) कस्य मातापितरौ निजस्य सन्तानस्य उन्नतिं विलोक्य प्रमुदितौ भवतः ?

(ग) कः स्वकीयं विशालं परिवारं सदा निन्दति ?

(घ) वर्तमानकाले के जनाः धन्याः ?

(ङ) कस्य परिवारः बहुसंख्यकः अस्ति ?

7. **अधोलिखितानां पदानां लकारं पुरुषं वचनञ्च लिखत –**

| पदानि | धातुः | लकारः | पुरुषः | वचनम् | |
|---|---|---|---|---|---|
| **यथा** – सन्ति | अस् | लट्लकारः | प्रथमपुरुषः | बहुवचनम् | |
| तिष्ठन्ति | ........ | ........ | ........ | ........ | ........ |
| भविष्यति | ........ | ........ | ........ | ........ | ........ |
| | | | | | |
| वर्तते | ........ | ........ | ........ | ........ | ........ |
| भवतः | ........ | ........ | ........ | ........ | ........ |
| अभवत् | ........ | ........ | ........ | ........ | ........ |
| गच्छेयुः | ........ | ........ | ........ | ........ | ........ |

8. **अधोलिखितानां पदानां लिङ्गं विभक्तिं वचनञ्च लिखत–**

| | पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **यथा** – | तेषाम् | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |

तासाम्

सन्देह:

कन्यासु

विद्यालये

परिवारस्य

## 9. विशेष्य - विशेषणयो: उचितं मेलनं कुरुत -

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| विशाले | ग्रामपरिवार: |
| एक: | गृहे |
| स्वकीयम् | सन्तानस्य |
| निजस्य | विशालम् |
| महती | कारणात् |
| अस्मात् | समस्या |

## 10. उदाहरणमनुसृत्य लकारपरिवर्तनं कुरुत -

| वर्तमानकाल: | भूतकाल: (लङ्लकार:) |
|---|---|
| **यथा** - तत्र एक: नर: अस्ति | तत्र एक: नर: आसीत् । |

(क) सः कुत्र गच्छति ? ...................................... ।

(ख) ते फलं खादन्ति । ...................................... ।

(ग) रीता विद्यालये पठति । ...................................... ।

(घ) वृक्षात् पत्राणि पतन्ति । ...................................... ।

(ङ) सः स्वपरिवारेण सह सुखेन तिष्ठति। ..................................... ।

## 11. अधोलिखितानां पदानां विलोमपदानि लिखत –

**यथा** – गच्छन्ति आगच्छन्ति

सर्वदा ....................

सम्पन्नः ....................

निजः ....................

मूर्खः ....................

धनवान् ....................

## योग्यता-विस्तारः

प्राचीन भारत में निवासियों की संख्या बहुत कम थी। भूखण्डों पर लोग जहाँ-तहाँ बस जाते थे । भूमि के क्रय-विक्रय का प्रश्न नहीं था । विपुल मात्रा में प्राप्त प्राकृतिक संसाधनों का स्वेच्छा से लोग प्रयोग करते थे । न कहीं जल की कमी थी, न ईन्धन की, न पशुओं की और न स्वोपार्जित अन्न की । परिणाम था कि प्राकृतिक संकट भले आते थे किन्तु सामान्य रूप से लोग तनावमुक्त एवं प्रसन्न रहते थे । ऐसी स्थिति में ही प्राचीन संस्कृत ग्रन्थों में ''अष्टपुत्रा भव'', पुत्रवती भव इत्यादि आशीर्वचन दिये जाते थे। सबका एक ही तात्पर्य था कि वंशवृद्धि हो, जनसंख्या बढ़े। कालक्रम से जनसंख्या इतनी बढ़ गयी कि प्राकृतिक संसाधन लोगों के लिए कम पड़ने लगे। इतना ही नहीं, जल, वायु, आकाश, पृथ्वी आदि सभी संसाधन प्रदूषित भी होने लगे। प्रकृति पर नियंत्रण रखने वाले जीव-जन्तुओं और वनस्पतियों का भयंकर संहार हुआ । विज्ञान ने मानव की सुख- सुविधा तो बढ़ा दी किन्तु समस्त पर्यावरण का प्रदूषण भी बढ़ा दिया। कहा जाता है कि विश्व में जनसंख्या का संतुलित वितरण नहीं है, किसी देश में संसाधनों से कम लोग हैं, तो किसी देश में सभी संसाधन मिल कर भी जनसंख्या की माँग पूरी नहीं कर सकते । हमारे देश में यह दूसरी स्थिति ही है ।

ऐसी स्थिति में जनसंख्या का नियंत्रण बहुत आवश्यक है । प्रसिद्ध दार्शनिक बर्ट्रेण्ड रसेल ने ज्ञान (Knowledge) तथा बुद्धि (Wisdom) का अन्तर बताते हुए यह उदाहरण दिया है कि ज्ञान ने मृत्युदर पर बहुत नियंत्रण कर लिया है किन्तु उस अनुपात में मनुष्य के पास यह बुद्धि नहीं थी कि जनसंख्या पर भी नियंत्रण किया

जाए। परिणामत: संसार के समक्ष सभी प्राकृतिक संसाधन कम पड़ने लगे । आज समस्त विश्व इस ओर जागरूक हो गया है कि जनसंख्या पर नियंत्रण किया जाये । हमारा पड़ोसी देश चीन अपनी विशाल जनसंख्या के लिए विश्वविख्यात था किन्तु उसके अधिकारियों ने बुद्धि का अद्भुत **उदाहरण** देते हुए जनसंख्या वृद्धि की दर लगभग शून्य तक पहुँचा दी है । हमारे देश में भी इसका अनुकरण करने के प्रयास हो रहे हैं किन्तु समुदाय की सदिच्छा के बिना यह कार्य असम्भव है ।

इस कथा के द्वारा दिखाया गया है कि छोटे परिवार का अपने संसाधनों से अच्छी तरह **भरण-पोषण** किया जा सकता है जिससे सभी सदस्य प्रसन्न रह सकते हैं । बड़े परिवार में संसाधन कितने भी हों उनका वितरण हो जाने पर वे कम पड़ जाते हैं ।

QQQ